International Journal of Sanskrit Research 2025; 11(2): 113-115

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2025; 11(2): 113-115
© 2025 IJSR
www.anantaajournal.com
Received: 13-02-2025
Accepted: 18-03-2025

**डॉ. शिवसाधनदेवनाथः**
सहायकाचार्यः (अ) केन्दीय संस्कृत विश्वविद्यालयः, एकलव्यपरिसरः, अगरतला, त्रिपुरा, भारत

Corresponding Author:
**डॉ. शिवसाधनदेवनाथः**
सहायकाचार्यः (अ) केन्दीय संस्कृत विश्वविद्यालयः, एकलव्यपरिसरः, अगरतला, त्रिपुरा, भारत

# रुद्राष्टाध्याय्याः काव्यसौन्दर्यविमर्शः

**डॉ. शिवसाधनदेवनाथः**

**DOI:** https://doi.org/10.22271/23947519.2025.v11.i2b.2600

## प्रस्तावना

शुक्लयजुर्वेदीयमाध्यन्दिनशाखायाः बहवः रुद्रस्तुतियुक्तमन्त्राः काव्यरसेन समाद्रिताः । विषयेऽस्मिन् रुद्राष्टाध्यायां बहुदृष्टान्तपरिलक्षते । अस्मिनध्याये सुर्येन सह भगवतो रुद्रदेवस्य अभिन्नरूपं प्रतिपादितम् । सुर्यस्य हि एकरूपो रुद्रः । सुर्यस्योदयकालस्य बहुरूपानुसारेण रुद्रदेवस्य बहुनाम । तथा च अस्तकालेन । सुर्यस्य उदय-अस्तकाले सहस्त्रकिरणः जगतम् अलोकितं करोति । तस्मात् कारणात् ऋषिणा क्रियते – मस्तकेव सुर्यस्य प्रतिविम्बम् । अपि च सर्वासु दिक्षु प्रसारितकिरणमाला दीर्घजटासदृशैव परिलक्षते । जटायाः एकः प्रतिशब्दः कपर्दः । यस्य जटा अस्ति स कपर्दी । तस्मात् कारणात् रुद्रस्य एकं नाम कपर्दी । सूर्यरूपे स्तूयमानस्य प्रत्यदेवरुद्रस्य तदुदयवर्णनं साहित्यरसिकजनानां मनोहरति । प्रत्यक्षादित्यरूपो भगवान्रुद्रदेव उदय-अस्तकाले ताम्रवर्णः । अपि च कपिलवर्णः सन् शोभनानि वितनोति । किरणरूपेण आदित्यं सहस्त्ररुद्राः प्राच्यादिषु समाश्रयन्ते । अनेन प्रकारेण उदयकाले भगवान् रुद्रदेवः मङ्गलमयरूपेण विराजते । तदुक्तञ्च –

"असौ यस्ताम्रे अरुण उत ब्रभ्रु सुमङ्गल:।
ये चैनं रुद्रा अभितो दिक्षु श्रिता: सहस्त्रशोवैषा हेड ईमहे ।।"[1]

भगवतो रुद्रस्य नीलकण्ठनामस्य महिमाऽपि अत्र वर्णनं क्रियते । अस्तमयकालीनसूर्यस्य रूपात् जातमेतत् नीलकण्ठरूपम् । यदा रविदेवेन अस्ताचले गमनं क्रियते तस्मिन् समये आकाशमण्डलं नानावर्णैः सुशोभन्ते । ताम्रवर्णसूर्यविम्बस्य विच्छुरितरक्तवर्णानि प्रतीचीगगणे शोभन्ते । सुर्यविम्बस्य मध्यभागे नीलवर्णयुक्तरेखा दृश्यते । मध्यस्थलकण्ठदेशैव । तस्मात् कारणात् सुर्यस्य अपरमेकं नाम नीलकण्ठः नीलग्रीवः वा । सूर्येन सह अभिन्नरुद्रस्य नामापि नीलकण्ठैव । नीलकण्ठरक्तवर्णसूर्यरूपभगवान् रुद्रदेवो गगणपटे शनै शनै गमनं करोति । तस्य मनोहररूपं क्षेत्रतः प्रत्यावर्तनमानाः गोपालगणाः अपि दृष्ट्वा अनन्दं लभन्ते । अपि च सायनकाले जलाहरणकारिणीस्त्रीगणाः आदित्यस्वरूपरुद्रदेवस्य अपरूपसौन्दयं परिलक्षन्ते । तद् प्रोक्तञ्च –

---

[1] शु.य.वे.१६.६

"असौ योऽवसर्पति नीलग्रीवो विलोहतः ।
उतैनं गोपा अदृश्यन्नुदहार्यः स मृडयति नः ।।"[2]

पदस्य पुनरावृत्तिः कविप्रतिभायाः अपरः प्रकाशः । रुद्राध्याय्यां ' मा नः ' इति पदद्वयस्य पुनरावृत्तिद्वारा रुद्राध्याय्याः काव्यसौन्दर्यं प्रकाशयति । अस्मिन् विषये मन्त्रद्वयं यथा –

"मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ।।

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
मा नो वीरान् रुद्र भामिनो वधीर्हविष्यन्तः सदमित्वा हवामहे ।।"[3]

"तेषां सहस्त्रयोजनेऽव धन्वानि तन्मसि" इति मन्त्राशप्रायशः दशसु मन्त्रेशु प्रयोगं कृत्वा अस्मिन् प्रकरणे भगवतो रुद्रदेवस्य सर्वव्यापकत्वं प्रकाशयति ।[4]

प्रकरणेऽस्मिन् भगवतो रुद्रदेवस्य एकैधिकरूपस्य वर्णनार्थं बहुवारं 'तेभ्यः' इति पदस्य व्यावहारः कृतः । यथा –

"नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमषिव-
स्तेभ्यो दश प्राचीर्दश दक्षणा दश

प्रतीचीर्दशोदीचीर्दशोध्वा स्तेभ्यो नमो अस्तु ते नोऽवन्तु
तेनो मृडयन्तु ते यं द्विष्मो यश्च नो देष्टि तमेषां जम्भे दध्मः।।
"[5] इत्यादयः ।

एकाधिकसमविवक्तिः प्रयोगं कृत्वा वाक्यसम्पादनस्य कौशलं शतरुद्रीयप्रकरणे दर्शयति । अत्र वारंवारं चतुर्थीविभक्तीनां प्रयोगे काव्यसृष्टेः सारल्यं परिलक्षते । येन अध्यायमानाजनाः सारल्येन अर्थवोधयितुं शक्नुवन्ति । यथा–

"नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च
मयस्कराय च नमः शिवाय च शिवतराय च ।।

नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च

नमस्तीर्थ्याय च कूल्याय च नमःशष्प्याय च फेन्याय च।।"[6] इत्यादयः ।

अव्ययशब्दस्य प्रयोगकौशलम् अस्मिन् प्रकरणे दृश्यते । सर्वे कवयः अव्ययव्यवहारः कुर्वन्ति। परन्तु एकस्य अव्ययपदस्य अधिकव्यवहारः प्रायशः न दृश्यते । अस्य प्रकरणस्य बहुमन्त्राः ' च ' इति अव्ययपदेन समादृताः । यथा –

"नमः श्वभ्यः श्वपतिभ्यश्च वो नमो मो भवाय च रुद्राय च नमः
शर्वाय च पशुपते च नमो नीलग्रीवा च शितिकण्ठाय च ।।

नमः कर्पर्दिने च व्युप्तकेशाय च नमः सहस्त्राक्षाय च शतधन्वने च नमो।

गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च।।"
[7] इत्यादयः ।

कृत्प्रत्ययस्य व्यवहारेऽपि काव्यरसाधिकं करोति ।"निशीर्य्य शल्यानां मुखा शिवो नः सुमना भव।"[8] इति मन्त्रांशे ' निशीर्य्य ' इति ल्यप् प्रत्ययस्य व्यवहारो वर्तते । शीङ् + ल्यप् = निशीर्य्य। अर्थात् शीर्णानि कृत्वा ।

तद्धितप्रत्ययस्य प्रयोगेऽपि काव्यसौन्दर्यं वर्द्धनं करोति ।" यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत् ।"[9] अत्र 'यथा' शब्दः थाल् प्रत्येन निष्पादितः । यद् + थाल् = यथा । अर्थात् येन प्रकारेण इति । पुनश्च "परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।"[10] मन्त्रेऽस्मिन् 'विश्वतः' इति शब्दः तसिल् प्रत्यययुक्तः । विश्व+ तसिल् = विश्वतः । अर्थात् विश्वतेः इति विश्वतः ।

---

[2] शु.य.वे.१६.७
[3] शु.य.वे. १६.१५-१६
[4] शु.य.वे.१६.५४-६३
[5] शु.य.वे.१६. ६४
[6] शु.य.वे.१६.४१-४२
[7] शु.य.वे.१६.२८-२९
[8] शु.य.वे.१६. १३
[9] शु.य.वे.१६. ४
[10] शु.य.वे. १६.१२

**निष्कर्ष:**

शक्लयजुर्वेदीय शतरुद्रीयप्रकरणस्य बहुमन्त्राः काव्यरसेन समादृताः इति स्वीकरणीयाः । ते मन्त्राः कवीनां भावमाधुर्येण अतुल्याः । सूर्यस्योदयास्तकालस्य वर्णनायां, शब्दस्य पुनरावृत्तिप्रतिभा, अव्ययशब्दस्य व्यवहारः, प्रत्ययस्य प्रयोगश्च इत्यादिभिः विषयैः काव्यसौन्दर्यं न नुन्यं भवति । अपि तु कवेः कवित्वशक्तेः परिचयः परिलक्षते ।

**संदर्भ**


1. शु.य.वे.१६.६
2. शु.य.वे.१६.७
3. शु.य.वे. १६.१५-१६
4. शु.य.वे.१६.५४-६३
5. शु.य.वे.१६. ६४
6. शु.य.वे.१६.४१-४२
7. शु.य.वे.१६.२८-२९
8. शु.य.वे.१६. १३
9. शु.य.वे.१६. ४
10. शु.य.वे. १६.१२